International Journal of Jyotish Research: 2020; 5(1): 45-48

International Journal of Jyotish Research (वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2020; 5(1): 45-48
© 2021 Jyotish
www.jyotishajournal.com
Received: 10-11-2019
Accepted: 29-12-2019

**डॉ. आलोक शर्मा**
सहायक आचार्य (ज्योतिष), राजकीय महाराज आचार्य संस्कृत महाविद्यालय, गाँधीनगर, जयपुर, भारतः।

**Correspondence**
**डॉ. आलोक शर्मा**
सहायक आचार्य (ज्योतिष), राजकीय महाराज आचार्य संस्कृत महाविद्यालय, गाँधीनगर, जयपुर, भारतः।

# कारक ग्रहाणां दशान्तर्दशावशात् व्यवसायकालविचार:

**डॉ. आलोक शर्मा**

**सारांश**
पृथिव्यां लब्धजने: प्रत्येकं जनस्य जन्मकालमभिलक्ष्य एका-कुण्डली निर्मिता भवति, तत्र रविचन्द्रादय: ग्रहा कथं योगं निर्मान्ति, तेषां विवरणम् प्रकृतशोधलेखे प्रस्तोष्यते, पुन: बृहत्पाराशरहोराशास्त्रानुसारं सर्वेषां ग्रहाणां या दशा: भवन्ति तासां फलं निर्वक्ष्यते, अस्यां दिशि कार्यं विदधानानां कृतेऽयं शोधलेख: पाथेयमिव भविष्यतीति आशासे।

**कूट शब्द:** वृ. पा. अ. - वृहत्पाराशरहोराशास्त्रम्, दशान्तर्दशाणा व्यवस्था, जन्म कुण्डल्यां, शुभग्रहयुक्ताः, विंशोत्तरीदशा, ग्रहाणां, शुभफलप्रदा, राशीनां, शुभग्रहैः, नीचराशिस्थितः, सूर्यदशाफलम्।

## प्रस्तावना

जन्म कुण्डल्यां ये ग्रहाः व्यवसायकारकाः भवन्ति अथवा येषु ग्रहेषु योगकारकता भवति। योगकारक ग्रहाणां शुभाशुभफलं कदा जातकस्य कृते मिलिष्यतीत्यत्र विचारणीयो विषयः अस्ति। प्रसङ्गेस्मिन् आचार्यः शुभाशुभफलस्यकालनिर्धारणं दशान्तर्दशाणा व्यवस्था कृता, दशासु अपि अनेकानेकदशा आचार्ये निरूपिता परन्तु पराशरेण विंशोत्तरीदशा प्रधानरूपेण स्वीकृता सम्प्रत्यऽपि विंशोत्तरीदशा अधिकरूपेण प्रचलिता अस्ति, कारक ग्रहाणां शुभाशुभकालनिर्धारणे इयम् दशा प्रसिद्धा अस्ति।
शुभयोगकारक ग्रहाणां दशा यदा आगच्छति तदेव तेषां विशेषयोगफलं जातकस्य कृते मिलति तेषामपि यदि शुभाशुभग्रहाणां दशामध्ये प्रथमं शुभग्रहस्य दशायाः फलं मिलिष्यति। तदनन्तरं अशुभस्य फलं मिलिष्यति। सर्वेषां दशाभेदानां फल सामान्यतया सामान्यविशेष भेदेन द्विधा भवति। ग्रहाः स्व-स्वभावानुसारं शुभाशुभफलानि ददति। एवमेव ग्रहाणां भावराशिस्थितिवशात् दशाफलस्य निर्धारणं भवति। निसर्गतः शुभग्रहाः अपि भाववशात् क्वचिद् अशुभाः निसर्गतः अशुभग्रहाः अपि क्वचित् शुभफलप्रदा भवन्ति –

**"ग्रहवीर्यानुसारेण फलंन्येव देत्" -** बृहद्धोराशास्त्रे दशाफलाध्याये पृ०४९७

१. ग्रहाणां बलाबलानुसारेण दशाभेदानां फलभेदाः भवन्ति। अर्थात् बलान अशुभग्रहा विशेषतया अशुभ फलं ददाति। निर्वलाः शुभग्रहाः अपि साधारणशुभफलान्येव ददाति न तु विशेषफलम्।
२. ये ग्रहाः राशीनां प्रथमद्रेष्काणे स्थिता दशायाः प्रारम्भवर्षेषु एवं मध्यद्रेष्काणे स्थिता दशानां मध्यभागे अन्तिमद्रेष्काणे स्थिता दशायाः अन्तिम समये फलं ददाति।
सर्वेषां दशा भेदानां भावानुसारेण दशावर्षेषु ग्रहाणां जन्मकालिकस्थितिवशात् द्रेष्काणभेदानुसारेण फलभेदा निर्णेया: भवन्ति। यथा –

शनिदशाया एकोनविंशतिवर्षेषु त्रिधाविभागे वर्षषट्कं मासचतुष्टयं च भवति शनिगतांशा: ७/४५ इति स्थितौ प्रथमद्रेष्काणे भवति। तदा दशरम्भे षडवर्षाणि यावत् शनि ग्रहस्य विशेषफलं ज्ञेयम्।
३. यदि ग्रहाः वक्राः भवन्ति तदाद्रेष्काण भेदानां विपरीतक्रमानु सारेण फल वेधः मन्तव्यः।

### गोचरवशातदशाफलभेदा:

दशारम्भ समये महादशेशस्य अन्तर्दशेशस्य च स्थान वशात् फलभेदा भवन्ति। तद्यथा उभयोः स्थिति: केन्द्रेत्रिकोणेवा भवति तदा शुभफलदायकत्वम्। यदि गोचरे चन्द्रलग्नवशात् जन्मलग्नशात् उच्चनीचादि स्थान भेदेन च शुभाशुभ फलयोः वैपरीत्यं दृश्यते।

**सामान्यतः दशानां फलानि**

सूर्यदशाफलम्-जन्मसमये सूर्यः स्वक्षेत्रे स्वोच्चे मूलत्रिकोणे परमोच्चे वा केन्द्रत्रिकोणे वा स्यात् नवमेश, दशमेशेन युक्त, बलवान् चेत् तदा तद्दशायां महत्सुखं, धनलाभश्च राजसम्मानादिकं च विशेषतः भवन्ति। तदुक्तम् — बृहत्पाराशरे

**मूलत्रिकोणे स्वक्षेत्रे स्वोच्चे वा परमोच्चगे।**
**केन्द्रत्रिकोणलाभस्थे भाग्यकर्माधिपैर्युते॥**
**सूर्ये बलेन संयुक्ते स्ववर्गेऽपि बलैर्युते।**
**तस्मिन् दाये महत् सौख्यं धनलाभादिकं शुभम्॥**
**अत्यन्तं राजसम्मानमश्वान्दोल्यादिकं सुखम्।**
**सुताधिपसमायुक्ते पुत्रलाभं च विन्दति॥**
**धनेशस्य च सम्बन्धे गजान्तैश्वयमादिशेत्।**
**वाहनाधिपसम्बन्धे वाहनत्रयमादिशेत्॥**
**नृपाल तुष्टिवित्ताढ्यः सेनाधीशः सुखी नरः।**
**वस्त्रावाहनयुक्तश्च सबलार्क – दशाफलम्[1]"॥**

यदि सूर्यः नीचस्थाने रन्ध्रे स्थाने (६-८-१२) दुर्बलाः पाययुक्तञ्च, रन्ध्रेशेयुक्तोवा भवति चेत् तद् समये धन धान्यानांनाशं करोति तथा राजभयेन पीडितं प्रवासिनं यशोहीनं बान्धवै: मित्रैश्च वियुक्तं करोति। पाराशरेण उक्तं हि –

**"नीचे षडष्टके रिष्फे दुर्बले पापसंयुते।**
**राहुकेतुसमायुक्ते दुःस्थानाधिप संयुते॥**
**तस्मिन् दाये महापीडा धनधान्यविनाशनम्।**
**राजकोषः प्रवासश्च राजदण्डो धनक्षयः॥**
**ज्वरपीडा यशोहानिर्बन्धुमित्रविरोधनम्।**
**पितृक्षयभयं चैव गृहे त्वशुभमेव च॥**
**पितृवर्गे मनस्तापो जनद्वेषस्स्तथैव च।**
**शुभदृष्टियुते सूर्ये मध्ये तस्मिन् क्वचित् सुखम्॥**
**पापग्रहेण संदृष्टे वदेत् पापफलं सुधीः[2]"।**

**चन्द्रदशाफलम् -**

चन्द्रदशायां यदिचन्द्रमा स्वक्षेत्रे स्वोच्चे, केन्द्रत्रिकोणे वा एकादशस्थाने वा स्थितः सन् शुभग्रहैः युक्ता चेत षडवली च नवमेश दशमेशेयोः सम्बन्धश्चेत तदा धन धान्य सौभाग्यवृद्धिकरो भवति। एवं वाहनलाभस्य राजदर्शनस्य सर्वविधमनोरथानां पूरको भवति। यथा पाराशरेणउक्तम्-

**"स्वोच्चे स्वक्षेत्रगे चैव केन्द्रे लाभत्रिकोणगे।**
**शुभग्रहेण संयुक्त पूर्णेन्दौ बलसंयुते॥**
**कर्मभाग्यसुखेशैस्तु बलिभिः संयुते यदि।**
**आद्यन्तैश्वर्यसद्भाग्यधनधान्यादिकागमः॥**
**गृहे तु शुभकार्याणि वाहनं राजदर्शनम्।**
**यत्रकार्यार्थसिद्धिः स्याद् गृहे सर्वसमृद्धयः॥**
**मित्रप्रभुवशाद् भाग्यं राज्यलाभो महत् सुखम्।**
**अश्वान्दोल्यादिलाभश्च श्वेतवस्त्रादिकं भवेत्॥**
**धनस्थानगते चन्द्रे तुङ्गे स्वक्षेत्र गेऽपि वा।**
**अनेकधनलाभं च भाग्यवृद्धिं महत् सुखम्॥**
**विशेषं राजसम्मानं विद्यालाभं च विन्दति[3]"।**

यदि चन्द्रमा निर्बलः पापमुक्तः नीचांशगताः रन्ध्र स्थिता (६-८-९२) रन्ध्रेशेन युक्तो वा तदा अशुभफलं शरीरदौर्वल्यं आलस्य मनोविकारं नेत्रविकारं पितृहानिं मातृहानिं च प्रददाति। तदुक्त पराशरेण

**"नीचे वा क्षीणचन्द्रे वा धनहानिर्भविष्यति।**
**दुश्चि बलसंयुक्ते क्वचित् सौख्यं क्वचिद्धनम्॥**
**दुर्बले पापसंयुक्ते देहजाड्यं मनोरुजा।**
**भृत्यपीडावित्तमहानिर्मातृवर्गजनाद् वधः॥**
**षष्ठाष्टमव्यये चन्द्रे दुर्बले पापसंयुते[4]"।**

**भौमदशाफलम् -**

भौमदशायां यदि भौमः स्वक्षेत्रे स्वोच्चे मूलत्रिकोणे लाभस्थाने वा स्थितः सन् शुभग्रहैः युक्तो वीक्षितोवा षडद्धली च नवमेशदशमेशयो सम्बवश्च चेत् तदा राज्य लाभं, भूमिलाभं धनधान्यलाभ: विदेश पर्यटन लाभ: भ्रातृणां वृद्धिञ्च करोति। पाराशरेणोक्तम् हि –

**"परमोच्चगते भौमे स्वोच्चे मूलत्रिकोणगे।**
**स्वर्क्षे केन्द्रत्रिकोणो वा लाभे वा धनगेऽपि॥**
**सम्पूर्णबलसंयुक्ते शुभदृष्टे शुभांशके।**
**राज्यलाभोभूमिलाभोलाभोधान्यादिसम्पदाम्॥**
**अधिकं राजसम्मानं, वाहनाम्वर भूषण।**
**विदेशे स्थानलामश्च सोदराणां सुखं भवेत्[5]"॥**

यदि च भौमः निर्बलः पापयुक्तः शगुस्थान नीचांशगत: रन्ध्रेस्थितः पापदृष्टेः च चेत् तदा अशुभ फलं ददाति। यथा –

**"नीचादिदुः स्थगे भूमिसुते बलविवर्जिते।**
**पाषयुक्ते पापदृष्टे सा दशा नेष्टदायिका[6]"॥**

**राहु दशाफलम् -**

राहुदशायां राहुर्यदि स्वोच्चादिगतः शुभग्रहयुक्ताः चेत् तदा तद दशारम्भे पुत्रलाभं, गृहलाभं धर्मवृद्धिं, विदेशे राजसम्मानं प्रतिष्ठां च प्रदापयति। यथा हि –

**"राहोस्तु वृषभं केतोर्वृश्चिकं तुङ्गसंज्ञकम्।**
**मूलत्रिकोणकं युग्मं चापं वेद्यं यथाक्रमम्॥**
**घटाली अपि वा कन्या-मीनौ कैश्चिद् गृहे स्मृते।**
**तद्दाये बहुसौख्यं च धनधान्यादिसम्पदाम्॥**
**मित्रप्रभुवशादिष्टं वाहनं पुत्रसम्भवः।**
**नूतनागारनिर्माणं धर्मचिन्तामहोत्सवः[7]"॥**

यदि राहु नीचराशौ अष्टमे द्वादशे वा पापग्रह युक्तश्चेत् मारकेशैः युक्तो वा चेत् तदा स्थान हानिं स्थान परिवर्तनं स्त्रीपुत्राणां नाशं कदन्नभोजनं दशारम्भे कष्टम् अत्यन्त कष्टं स्थाननांश मानसिक पीडां च करोति। पराशरेण उक्तम् –

**"रन्ध्रे वा व्ययगे राहौ तद्दाये राहौ तद्दाये कष्टदं फलम्।**
**पापग्रहेण सम्बन्धे मारकग्रहसंयुते॥**
**नीचराशिगते वापि स्थानभ्रंशो मनोरुजा।**
**नाशो हि दारपुत्राणां कदन्नानां च भोजनम्॥**
**दशादौ देहपीडा च धनधान्यपरिच्युतिः[8]।**

---

[1] वृ. पा. अ. – ४९, श्लो. – ७ से ११

[2] वृ. पा. अ. – ४९, श्लो. – १२ से १५

[3] वृ. पा. अ. – ४९, श्लो. – १७ से २२

[4] वृ. पा. अ. – ४९, श्लो. – २३ से २५

[5] वृ. पा. अ. – ४९, श्लो. – २६ से २९

[6] वृ. पा. अ. – ४९, श्लो. – ३२

[7] वृ. पा. अ. – ४९, श्लो. – ३४ से ३७

**बृहस्पतिदशाफलम् -**

गुरुदशायां यदि गुरुः स्वक्षेत्रे स्वोच्चेर केन्द्रे त्रिकोणे वा एकादश स्थाने वा स्थितः सन् शुभग्रहैः युक्ताश्चेत् षड्बली च नवमेश दशमेशयोः सम्बन्धश्चेत् तदा राज्यलाभः, राजप्रशंसा, गजाश्व सुखं, देवब्राह्मण पूजनार्थन्त्रावसरः, वस्त्रलाभं, यज्ञादिकर्मसु सफलता, वेदान्तविद्यायां रुचिः, राजकृपा, इष्टसिद्धिः, सुखोपभोगः, धनलाभं, पुत्रादिलाभो वाहनलाभश्च सर्वविधमनोरथाना पूरको भवति। पाराशरेण उक्त हि –

**"स्वोच्चे स्वक्षेत्रे जीवे केन्द्रलाभत्रिकोणगे।**
**मूलत्रिकोणस्थाने वा तुङ्गांशे स्वांशगेऽपि वा॥**
**राज्यलाभो महत्सौख्यं राजसन्मानकीर्त्तनम्।**
**गजवाजियुतिश्चैव देवब्राह्मणपूजनम्॥**
**दारपुत्रादिसौख्यं च वाहनाम्बरजं भवेत्।**
**याज्ञादिकर्मसिद्धिः स्याद्वेदान्तश्रवणादिकम्[9]"॥**

यदि बृहस्पति निर्बलः पापयुक्तः अस्तगत: नीचराशिस्थिते, नीचांशगताः, रन्ध्रस्थितः (५-८-१२) रन्ध्रेशेन युक्तो वा तदा अशुभ फलं ददाति - यथा वाहन हानिं स्थान हानिं मनस्तायम् पुत्रपीड़ादिभयं पश्चादिहानिं, तीर्थयात्रायां व्ययः प्रददाति दशारम्भे कष्टं, पश्चादिलाभं दशाया मध्येअन्ते च सुखं राजसम्मानं ददाति। यथा पराशणेक्तम् –

**"नीचास्तपापसंयुक्ते जीवे रिष्फाष्टसंयुते।**
**स्थानभ्रंशो मनस्तापः पुत्रपीडा महद्भयम्॥**
**पश्चादिधनहानिञ्च तीर्थयात्रादिकं भवेत्।**
**आदौ कष्टं फलं भूयो भवेल्लाभश्चतुष्पदाम्॥**
**मध्यान्ते सुखमाप्नोति राजसम्मानवैभवम्[10]"।**

**शनिदशाफलम् -**

शनिदशायां यदि शनि स्वक्षेत्रे, स्वाच्चे स्वमित्रक्षेत्रे, मूलत्रिकोणेवा एकादशास्थाने स्थाने वा सन् शुभग्रहैः युक्ता चेत् षडवली च नवमेश दशमेशयोः सम्बधश्चेत् तथा स्वनवाशे तृतीय भावोस्थित: चेत् तदा राज सम्मानं, धनलाभं सत्कीर्तिः लाभः विद्यालाभ: वस्त्र भूषणादिलाभ राजकृपा, गजाश्वयानसुखम्, वस्त्राभूषण प्राप्ते भवति गृहे धनधान्यं प्रचूरता सुखं भवति तथा च स्त्रीपुत्रादि सुखं वृद्धिं भवति। पाराशरेणातदुक्तम्हि –

**"स्वोच्चे स्वक्षेत्रगे मन्दे मित्रक्षेत्रेऽथवा।**
**मूलत्रिकोणे भाग्ये वा तुङ्गांशे स्वांशगेऽपि वा॥**
**दुश्चिक्ये लाभगे चैव राजसम्मानवैभवम्।**
**सत्कीतिर्धर्मलाभश्च विद्यावाद-विनोदनम्॥**
**महाराजप्रसादेन गजवाहन भूषणम्।**
**राजयोगो भवेदेवं सेनाधीशान्महत्सुखम्॥**
**लक्ष्मीकटाक्षचिह्नानि राज्यलाभोऽपि सम्भवेत्।**
**गृहे कल्याणसम्पत्तिर्लाभो दारसुतादिजः[11]"॥**

यदि शनि नीचराशि स्थिते, अस्तंगते, नीचांशगता: निर्बल: पापयुक्तः रन्ध्रेस्थितः (६-८-१२) रन्ध्रेशेनयुक्तोवा तदा विषपीडादिभयं, शत्रुपीडा स्थानहानिं, ऊपमानः राजपीड़ा, स्त्रीपुत्रादि कष्टं भवति। यदि शुभग्रहेण युक्तः दृष्टौ वा तथा केन्द्रत्रिकोणे वा स्थितश्चेत् तदा राज्यप्राधिं वाहनादिलाभं वस्त्रादि लाभं धनलाभ च प्रददाति। तदापाराशरेण उक्तं हि –

**"षष्ठाष्टमव्यये मन्दे नीचे वाऽस्तंगतेऽपि वा।**
**विषशस्त्रादिपीडा च स्थानभ्रंशो महद् भयम्॥**
**पितृमातृवियोगश्च दारपुत्रादिपीडनम्।**
**राजवैषम्यकार्याणि ह्यनिष्टं बन्धनं तथा॥**
**शुभयुक्तेक्षित मन्दे योगकारकसंयुते।**
**केन्द्रत्रिकोणलाभे वा मीनगे कार्मुके शनौ॥**
**राज्यलाभो महोत्साहो गजाश्वाम्बरजं सुखम्[12]"॥**

**बुधदशाफलम् -**

बुधदशायां यदि बुधः स्वोच्चगतः स्वक्षेत्रे, स्वमित्रे, स्वनवाशे मूलत्रिकोणे वा एकादशस्थाने वा सन् शुभग्रहैः युक्तः चेत् षड्बली च नवमेशदशमेशयोः सम्बन्धञ्चेत् तदा धनधान्यलाभः सत्कीर्तिः, ज्ञानवृद्धिः राजमैत्री, सत्कर्मप्राप्तिः, आरोग्यता दुग्धमिश्रित-भोजनप्राप्तिः लक्ष्मीव्यापारादिलाभः सर्वाविधिमनोस्थानां पूर्तिश्च भवति। पाराशरणोक्तम् हि –

**"स्वोच्चे स्वक्षेत्रसंयुक्ते केन्द्रलाभत्रिकोणगे।**
**मित्रक्षेत्रसमायुक्ते सौम्ये दाये महत् सुखम्॥**
**धनधान्यादिलाभश्च सत्कीर्त्तिधनसम्पदाः।**
**ज्ञानाधिक्यं नृपप्रीतिः सत्कर्मगुणवर्धनम्॥**
**पुत्रदारादिसौख्यं च देहारोग्यं महत् सुखम्।**
**क्षीरेण भोजनसुखं व्यापारात् स्याद्धनागमः।**
**शुभदृष्टियुते सौम्ये भाग्ये कर्माधिये दशाः॥**
**आधिपत्ये बलवती सम्पूर्ण – फलदायिका[13]"॥**

यदि बुध: निर्बलः पापयुक्त: नीचराशिस्थिते, अस्तंगत: नीचांशगतः रन्ध्रेस्थितः (६-८-१२) रन्ध्रेशेनयुक्तोवा तदा राजविग्रहं, बधुनाशं शत्रुमयं, विदेशयात्रा, परसेवारत: कलहायमः मुत्रादिरोगं, महाकष्टं चौरमयं, कृषि गोधननाशं करोति।
शुभदशारम्भे धनधान्य वृद्धिः विद्या लाभं सुखप्राप्ति लक्ष्मी व्यापारादि लाभं ददाति, दशामलन्तेकष्टं प्रददाति। यथा – पाराशरेणोक्तम्

**"पापग्रहैर्युते दृष्टे राजद्वेषं मनोरुजम्।**
**विरोधं बान्धवजनैर्विदेशगमनं तथा॥**
**परप्रेष्यं च कलहं मूत्रकृच्छ्रान्महद् भयम्।**
**षष्ठाष्टमव्यये सौम्ये लाभभोगार्थनाशनम्॥**
**वातपीडामपि तथा पाण्डुरोगं वदेद् बुधः।**
**नृपचौराग्नि भीतिं च कृषिगोभूमिनाशनम्॥**
**दशादौ धनधान्यं च विद्यालाभं महत् सुखम्।**
**पुत्रकल्याणसम्पत्तिं सम्मार्गाच्च धनागमम्॥**
**मध्ये नरेन्द्रसन्मानमन्ते दुःखं च निर्दिशेत्[14]"॥**

**केतुदशाफलम् -**

केतुदशायां यदि केतुः स्वक्षेत्रे, स्वोच्चे, स्वमित्रे, शुभग्रहैर्युक्तो दृष्टो वा शुभवर्गेस्थितः केन्द्रत्रिकोणेवां बलवान नवमेशदशमेशयोः सम्बद्धश्चेत् तदा राजमैत्री, सर्वमनोरथानां प्राप्तिं देशेग्रामेश्चाधिकारं वाहवप्राप्तिं, देशे-विदेशयात्रादिसुखं स्त्रीपुत्रादि लाभं च प्रददाति। तृतीय- षष्ठ-एकादश भावे स्थिते सर्वसुखं प्रददाति, मित्रनवांशे गजाश्वयानसुखं ददाति। दशारम्भे राजयोगप्रदः भवति दशामध्येमहद्भयं दशयामन्ते यात्रादिलाभं प्रददाति। यथा पाराशरेणोक्तम् –

[8] वृ. पा. अ. – ४९, श्लो. – ४० से ४२
[9] वृ. पा. अ. – ४९, श्लो. – ४४ से ४७
[10] वृ. पा. अ. – ४९, श्लो. – ४९ से ५१
[11] वृ. पा. अ. – ४९, श्लो. – ५३ से ५६
[12] वृ. पा. अ. – ४९, श्लो. – ५७ से ५९
[13] वृ. पा. अ. – ४९, श्लो. – ६१ से ६४
[14] वृ. पा. अ. – ४९, श्लो. – ६५ से ६९

**"केन्द्रे लाभे त्रिकोणे वा शुभराशौ शुभेक्षिते।**
**स्वोच्चे वा शुभवर्गे वा राजप्रीतिमभीप्सिताम्॥**
**देशग्रामाधिपत्यं च वाहनं पुत्रसम्भवम्।**
**देशान्तरप्रयाणं च ततोऽप्यतिसुखं वदेत्॥**
**पुत्रदारसुखं चैव लाभश्चापि चतुष्पदाम्।**
**दुश्चिक्ये षष्ठलाभे वा केतुदाये सुखं तथा॥**
**राज्यं तथैव सन्मित्रगजवाजिसमन्वितम्।**
**दशादौ राजयोगाः स्युर्दशामध्ये महद् भयम्॥**
**अन्ते दूराटनं चैव देहविश्रमणं तथा।**
**धने रन्ध्रे व्यये केतौ पापग्रहयुतेक्षिते**
**निगडो बन्धुनाशश्च स्थानभ्रंशो मनोरुजा[15]" ॥**

यदि केतुः निर्बल, पापयुक्तः नीचराशिस्थिते नीचांशगताः रन्ध्रेशेनयुक्तो वा तदा कारागारदि बधबधनकष्टं प्रददाति एवं मानसिककष्टं मानहानि दुष्टसंगतिः प्रददाति।

**शुक्रदशाफलम् -**

शुक्रदशायां यदि शुक्रः स्वक्षेत्रे स्वोच्चे, स्वमित्रे, स्वनवांशे केन्द्रमूलत्रिकोणे वा एकादशस्थाने वा सन् शुभग्रहैः युक्तश्चे चेत् षड्बली च नवमेश दशमेशयोः सम्बद्धश्चेत् तदा राज्याभिषेकं गजाश्ववाहनादिलाभं, राजसम्मानाधिपत्यलाभं, संगीतवादनाद्यवसरं प्रददाति । गृहे लक्ष्मीं व्यापारवृद्धिं नवीनग्रहस्थानलाभ, बन्धुमित्राणां समागमं राज्यप्राप्तिमेवं सम्पूर्णमनोरथानां प्राप्तिं च करोति । तथा हि पाराशरेणोक्तम् –

**"रेतसः कारकत्वेन विश्रुतस्य भृगोरिह।**
**दशाफलन्त्वविकलं वक्ष्यामि शृणु सन्मुने!॥**
**परमोच्चगते शुक्रे स्वोच्चे स्वक्षेत्रकेन्द्रगे।**
**नृपाभिषेकसम्प्राप्तिर्वाहनाम्बरभूषणम्॥**
**गजाश्वपशुलाभश्च नित्यं मिष्टान्न भोजनम्।**
**अखण्डमण्डलाधीशराजसम्मानवैभवम्॥**
**मृदङ्गवाद्यघोषश्च गृहं लक्ष्मीकटाक्षयुक्।**
**त्रिकोणस्थेऽवा मीने राज्यार्थगृहसम्पदः॥**
**विवाहोत्सवकार्याणि पुत्रकल्याणवैभवम्।**
**सेनाधिपत्यं च तथा स्वेष्टबन्धुसमागमः॥**
**नष्टराज्याद्धनप्राप्तिगृहे गोधनसङ्ग्रहः[16]" ॥**

यदि शुक्रः निर्बलः पापयुक्तः नीचराशिस्थितः असंगतः, नीचांशगरन्ध्रेस्थितः रन्ध्रेशेन युक्तो वा तदा मानसिककष्टं, स्त्रीपुत्रादिदुःखम् धनव्यापारादिहानिं च करोति।
यदि शुक्रः नवमदशमाधिपतिः चेत् प्रथमचतुर्थभावे स्थितः तस्य दशायां महत्सुखं ददाति तदा जनाधिकारः देवालयः तडागादि स्थानानां निर्माणं अन्नदानं स्त्रीपुत्रादिलाभं प्रददाति। यदि शुक्रः द्वितीयसप्तमाधिपतिश्चेत् तदा कष्टं भवति। यथा पाराशरेणोक्तम् –

**"षष्ठाष्टमव्यये शुक्रे नीचे पापयुतेक्षिते।**
**आत्मबन्धुजनद्वेषो दारवर्गपीडनम्॥**
**व्यवसायात् फलं नष्टं गोमहिष्यादिसंक्षयः।**
**दारपुत्रादिपीडा वा वियोगञ्चात्मबन्धुभिः॥**
**भाग्यकर्माधिपत्येन लग्नवाहनराशिगे।**
**तद्दशायां महत् सौख्यं देशग्रामाधिपत्यजम्॥**
**देवालयतडागादि - पुण्यकर्मसु संग्रहः।**
**अन्नदाने महत् सौख्यं नित्यं मिष्टान्नभोजनम्॥**
**उत्साहः कीर्त्तिसम्पत्ती स्त्रीपुत्रधनसम्पदः[17]" ॥**

[15] वृ. पा. अ. – ४९, श्लो. – ७१ से ७६

[16] वृ. पा. अ. – ४९, श्लो. – ७७ से ८१

**सन्दर्भ**

1. वृहत्पाराशरहोराशास्त्रम् – श्रीधर शिवलालजी, ज्ञानसागर मुद्रणालय, मुम्बई
2. वृहत्पाराशरहोराशास्त्रम् – पं. ताराशङ्कर शास्त्री, खेमराज श्रीकृष्ण प्रकाशन, बम्बई

[17] वृ. पा. अ. – ४९, श्लो. – ८१ से ८६